**दिनाङ्क : 27.07.2025** **सायम् - 06:20**

**आदौ-मुख्यवार्ता:**

- प्रधानमन्त्रिणा श्री नरेन्द्र मोदिना अंतरिक्ष-विज्ञान-क्रीडा-सांस्कृतिक-क्षेत्रेषु भारतीयानाम् उपलब्धिषु गर्वं प्रकटितम्।
- आकाशवाण्यां स्वस्य 'मन की बात' इत्यस्मिन् कार्यक्रमे प्रधानमन्त्रिणा उक्तं यत् आत्मनिर्भरतायाः माध्यमेन सप्तचत्वारिंशदधिक-द्विसहस्रतम-वर्षपर्यन्तं विकसितभारत भविष्यति।
- प्रधानमन्त्री नरेन्द्रमोदी अद्य तमिलनाडुराज्यस्य अरियालूरमण्डले आदि-तिरुवतीरायमहोत्सवे जनान् सम्बोधितवान्।
- रक्षामन्त्री राजनाथसिंहः अद्य प्रतिपादितवान् यत् ऑपरेशन सिन्दूरस्य सफलतायां निर्बाध-विस्तृत-व्यवस्था-संचालन-प्रबन्धनं निर्णायकं कारकम् आसीत्।
- उत्तराखण्डे अद्य हरिद्वारस्य मानसादेवीमन्दिरं प्रति गच्छति पदयात्रिकमार्गे स्टाम्पेड् इति पादाघातेन षट् जनाः मृता:।
- जर्मनी-देशे विश्वविद्यालय-क्रीडासु पञ्चसहस्र-मीटर-परिमित-धावन-प्रतियोगितायां एकल-क्रीडिका सीमा, पदकविजेत्री प्रथमा भारतीया महिला अभवत्।

**पीएम - मन की बात**

प्रधानमन्त्रिणा नरेन्द्र मोदिना अंतरिक्ष-विज्ञान-क्रीडा-सांस्कृतिक-क्षेत्रेषु भारतीयानाम् उपलब्धिषु गर्वं प्रकटितम्। आकाशवाण्याम्, स्वस्य मनकी बात, इत्यस्मिन् कार्यक्रमे राष्ट्रं सम्बोधयन् श्रीमोदी भारतीयवायुसेना-दलस्य दलनायकस्य शुभांशु-शुक्लस्य अन्तरिक्षात् प्रत्यागमनस्य विषये उक्तवान्। सः अवलोकितवान् यत् देशे आनन्दस्य तरङ्गः आसीत्, यदा भारतीयः अन्तरिक्षयात्री पृथिव्यां सुरक्षिततया अवतरितवान् तदा सम्पूर्णः देशः गौरवस्य भावम् अनुभवति स्म। सः अवदत् यत् अधुना बालाः विज्ञानस्य अन्तरिक्षस्य च विषये जिज्ञासां प्रकटयन्ति, अथ च अन्तरिक्षवैज्ञानिकाः भवितुम् महत्त्वाकांक्षां विकासयन्तः सन्ति।

अस्य मासस्य प्रारम्भे दुबईनगरे आयोजिते अन्ताराष्ट्रियरसायनशास्त्रस्य ओलम्पियाड्-क्रीडायां त्रीणि स्वर्णपदकानि, द्वौ रजतपदके, एकं कांस्यपदकं च प्राप्य राष्ट्राय गौरवं प्रदातॄणां भारतीयछात्राणां प्रशंसाम् अकरोत्। ते छात्रा: देवेश पंकज:, संदीप कुची, देबदत्त प्रियदर्शी, उज्जवल केसरी च आसन्। प्रधानमन्त्रिणा उक्तं यत् भारतेन गणितजगति स्वस्थानं सुदृढं कृतम्।

प्रधानमन्त्रिणा गौरवं प्रकटितं यत् युनेस्को-संस्थया द्वादश मराठादुर्गाः विश्वरिक्थस्थला: इति मान्यतां प्राप्तवन्तः। एतेषु महाराष्ट्रे एकादश दुर्गा:, तमिलनाडुराज्ये च एकः दुर्गः अस्ति। प्रधानमन्त्रिणा विस्तरेण उक्तं यत् सलहेर् दुर्गात् शिवनेरीदुर्गपर्यन्तं प्रत्येकस्य दुर्गस्य समृद्धः इतिहासः अस्ति, यत्र हिसलहेर् दुर्गे मुगलाः पराजिताः अथ शिवनेरीदुर्गे छत्रपतिशिवाजीमहाराज्ञः जन्म अभवत्।

प्रधानमन्त्री मोदी अष्टादश वर्षीयस्य स्वतन्त्रतासेनानी-खुदीरामबोसस्य साहसं प्रकाशयन्, अगस्तमासः क्रान्तिमासः इति उक्तवान्। सः अवदत् यत् अष्टोत्तर-ऊनविंशति-शततमे वर्षे अगस्तमासस्य एकादश-दिनाङ्के स्वतन्त्रतासेनानी यदा मृत्यु मुखं प्रति गच्छन् आसीत् तदा तस्य स्मितमुखमेव दृश्यते स्म, तदा बिहारस्य मुजफ्फरपुरस्य जनानां नेत्रेषु अश्रूणि आसन्, ये कारागारं परितः समागताः आसन् यत्र सः युवा देशभक्तः स्वस्य देशभक्तेः मूल्यं समर्पयति स्म।

भारते वस्त्रं केवलं आर्थिकक्षेत्रं न अपितु देशस्य सांस्कृतिक-वैविध्यस्य प्रतिनिधित्वमपि इति प्रधानमन्त्रिणा उक्तम्। सः प्रसन्नतां प्रकटितवान् यत् वस्त्र-परिधान-विपण्यं, तीव्रगत्या वर्धते, यत्र ग्रामेषु महिलानां, नगरेषु डिजाइनर-समूहानाम्, वृद्धानां बुनकानां, यूनां च योगदानं मिलित्वा कार्यं करोति। अधुना भारते त्रिसहस्रतोप्यधिकाः वस्त्र-स्टार्ट-अप्स सक्रियाः सन्ति, येषु बहवः वैश्विकस्तरस्य भारतस्य हस्तकरघा इत्यस्य प्रचारं कुर्वन्ति। श्रीमोदिना उक्तं यत् सप्तचत्वारिंशदधिक-द्विसहस्रतमे वर्षे विकसितभारतस्य मार्गः आत्मनिर्भरतायाः माध्यमेन गच्छति, आत्मनिर्भरभारतस्य आधारः च वोकल फोर लोकल इत्यस्मिन् अन्तर्भवति इति।

**<u>प्रधानमन्त्री - राजेन्द्रचोळ</u>**

प्रधानमन्त्री नरेन्द्रमोदी अद्य अपराह्णे तमिलनाडुराज्यस्य अरियालूरमण्डले ऐतिहासिकस्य चोळचक्रवर्तेः राजेन्द्रचोळप्रथमस्य जन्मदिवसस्य अवसरे प्रधानमन्त्री नरेन्द्रमोदी आदि-तिरुवतीरायमहोत्सवस्य समापनसमारोहं सम्बोधितवान्। अस्मिन् अवसरे वदन् श्रीमोदी अवदत् यत् सः अद्य मण्डलस्य गङ्गैकोण्ड-चोलपुरम-मन्दिरे चत्वारिंशदुत्तर-एकशत-कोटिभारतीयानां कल्याणाय भारतस्य निरन्तरप्रगतेः च प्रार्थनां कृतवान्। सः अवदत्, राज-राज-चोळस्य राजेन्द्रचोळस्य च नाम भारतस्य परिचयस्य, गौरवस्य च पर्यायः अस्ति।

प्रधानमन्त्रिणा भारतस्य महान् सम्राट् राजेन्द्रचोळ-प्रथमः इत्यस्य सम्मानार्थं स्मारकमुद्रा अपि लोकाय समर्पिता। संगीतरचनाकारः इळयराजः अपि अस्मिन् कार्यक्रमे प्रस्तुतिं कृतवान्। तमिलनाडु-राज्यस्य द्विदिवसीययात्रायाः द्वितीयदिने प्रधानमन्त्री भव्यं रोडशो इति पथप्रदर्शनम् अपि कृतवान्। अवधेयमस्ति यत् - अद्यतन-उत्सवः राजेन्द्र-चोळ-प्रथमस्य दक्षिणपूर्व-एशिया-देशान् प्रति समुद्रीय-अभियानस्य, यूनेस्को-सूचीकृतस्य गङ्गैकोण्ड-चोलपुरम्-मन्दिरस्य निर्माणस्य च सहस्रवर्षपूर्तिं चिह्नीकरोति।

**राजनाथ - दीक्षांत::**

रक्षामन्त्री राजनाथसिंहः अद्य प्रतिपादितवान् यत् ऑपरेशन सिन्दूरस्य सफलतायां निर्बाधं विस्तृत-व्यवस्था-संचालन-प्रबन्धनं निर्णायकं कारकम् आसीत् । अवधेयं यत् मन्त्री वडोदरा-मूलस्य गतिशक्तिविश्वविद्यालयस्य दीक्षांतसमारोहं वर्चुअल्-रूपेण सम्बोधयन् आसीत् । श्रीसिंहः रसदं सामरिकमहत्त्वस्य प्रिज्मद्वारा द्रष्टव्यं न तु केवलं मालवितरणस्य प्रक्रियारूपेण इति बोधितवान्। श्री सिंहः इदं प्रबन्धनम् सामरिकमहत्त्वस्य पृष्ठभूमिद्वारा द्रष्टव्यं न तु केवलं सामग्रीवितरणस्य प्रक्रियारूपेण इति बोधितवान्। श्री सिंहः देशस्य आर्थिकप्रगतेः लाजिष्टिक इत्यस्य महत्त्वं प्रकाशितवान्, मुख्यस्तम्भेषु एतत् अन्यतमम् इति उक्तवान् यत् पूर्वोत्पादनात् उपभोगपर्यन्तं प्रत्येकं पदं सम्बद्धयति।

**प्रधानमन्त्री-उत्तराखण्ड**

उत्तराखण्डे अद्य हरिद्वारस्य मानसादेवीमन्दिरं प्रति गच्छति पदयात्रिकमार्गे स्टाम्पेड् इति पादाघातेन न्यूनातिन्यूनं षट् जनाः प्राणान् त्यक्तवन्तः, विंशतिः जनाः च घातिताः। वरिष्ठ-पुलिस-अधीक्षकः प्रमेन्द्रसिंहडोभालः अवदत् यत् क्षेत्रे विद्युत्प्रवाहस्य प्रसारस्य मिथ्यावार्यायाः अनन्तरं एषा घटना अभवत्।

प्रधानमन्त्री नरेन्द्रमोदी-महोदयेन अस्मिन् घटनानुक्रमे जनानां प्राणहानौ दुःखं प्रकटितवान्। सः आहतानाम् शीघ्रं स्वस्थतायै प्रार्थनां कृत्वा स्थानीयप्रशासनं प्रभावितानां सहायतां करोति इत्यपि उक्तवान् । राष्ट्रपतिः द्रौपदि-मुर्मूः स्वसन्देशे सर्वेभ्यः शोकग्रस्तपरिवारेभ्यः हृदयस्पर्शी शोकसंवेदनां प्रकटितवती, आहतभक्तानाम् शीघ्रं स्वस्थतायै च प्रार्थनां कृतवती।

**क्रीडा**

भारतीया एकल-क्रीडिका सीमा, जर्मनी-देशे विश्वविद्यालय-क्रीडासु पञ्चसहस्र-मीटरात्मिकायां धावनक्रीडायां पदकविजेत्री प्रथमा भारतीया महिला अभवत् । सा च अस्यां क्रीडायां रजतपदकं प्राप्तवती ।